Reg. No. | | | | | | | | | |

**BSCSKLN 201/FNDSKLN 201/BSHSKLN 201/BFTSKLN 201/ BSASKLN 201/BIDSKLN 201/BHSSKLN 201/BFDSKLN 201**

**II Semester B.Sc./B.Sc.(FND)/B.Sc. (Home Science)/B.Sc.(FT)/ B.Sc.(A and VE)/B.Sc. (ID and D)/B.Sc. (HS)/B.Sc. (FD) Examination, September 2022 (NEP – 2020) (2021-22 Batch Onwards) (AECC)**

**SAMSKRITA LANGUAGE**

Time : 2 Hours　　　　Max. Marks : 60

***सूचना :*** *1) **संस्कृत**भाषया, **कर्णाटक**भाषया, **आङ्गल**भाषया वा उत्तराणि लिखत ।*
*2) प्रश्नसंख्या **IV** तथा **V** एतयो: उत्तराणि संस्कृतभाषया एव लेखनीयानि ।*

I. **एकं** अनुवादं कृत्वा विवृणुत ।　　　　**(1×5=5)**

1) कृष्णवचसा धर्मसूनु: सलिलान्त:स्थं सुयोधनमुवाच – 'राजन्, राजत्कर्पूररजनीपतिसुन्दरं शुभ्रं यश: भवता मलिनीकृतम् । रणे नरपतीन् घातयित्वा मानी प्राणरक्षां पुरस्कृत्य जीवन् न लज्जसे ? सम्प्रति युद्धाय समुत्थाय स्वां लक्ष्मीं त्रिदिवं वा समाप्नुहि । वीराणां विजयो निधनं वा समो हि लाभ: परिकीर्तित:' इति । युधिष्ठिरवचो निशम्य मन्युविषाकुलो दुर्योधन: स्तम्बेरम इव श्वसन् अवदत् – 'अहं तु निर्धनामेव श्रियं मन्ये । यथा वीरहीना ध्वजिनी, बुधवर्जिता गोष्ठी च न शोभते तथा स्वजनं विना लक्ष्मी: कस्य मन: प्रीणाति ? बन्धुमित्रविमुक्ता विभूतय: अन्धानां चित्रमालिका इव केवलं विडम्बना । मया भुक्तां विवर्जितां पृथिवीं वैराग्यमुक्ताभरणां जरतीं योषितमिव भुङ्क्ष्व' ।

2) आसीत् धौम्यस्य महर्षे: शिष्य: उपमन्युर्नाम । तमुपाध्याय: 'वत्स उपमन्यो, गा: रक्ष' इति प्रेषयामास । स उपाध्यायवचनात् गा: अरक्षत् । स च अहनि गा रक्षित्वा दिवसक्षये गुरुगृहमागम्य उपाध्यायस्य अग्रत: स्थित्वा नमश्चक्रे । तमुपाध्याय: पीवानमपश्यत्, उवाच चैनं – वत्स उपमन्यो केन वृत्तिं कल्पयसि, पीवासि!' स प्रत्युवाच – 'भो:, भैक्ष्येण वृत्तिं कल्पयामि' इति । तं गुरुरुवाच – 'मयि अनिवेद्य भैक्ष्यं नोपयोक्तव्यम्' इति । स तथेत्युक्त्वा भैक्ष्यं चरित्वा उपाध्यायाय न्यवेदयत् । स: सर्वमेव भैक्ष्यम् अगृह्णात् । स तथा इत्युक्त्वा पुनररक्षद् गा: । धौम्य: तथापि पीवानमेव दृष्ट्वा उवाच – 'सर्वं अशेषतस्ते भैक्ष्यं गृह्णामि । केन इदानीं वृत्तिं कल्पयसि ?'

P.T.O.

II. **चत्वारि** वाक्यानि सप्रसङ्गं विवृणुत । **(4×3=12)**

1) अस्य पुरुषोचितः व्यापारः क्रियताम् ।
2) द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ ।
3) तृष्णे देवि नमस्तुभ्यम् ।
4) बाला कल्याणरूपा स्त्री वैश्वानरं विशति ।
5) प्रीतौ स्वः, एष ते अपूपः । अशान एषाम् ।
6) तदिदम् आदित्यस्य दीपनीराजनं हि ।

III. **त्रीन्** प्रश्नान् प्रबन्धरूपेण उत्तरयत । **(3×8=24)**

1) स्नातकोपदेशः – पाठोक्तानि जीवनमौल्यानि निरूपयत ।
2) भीमेन कृतं कौरववधं निरूपयत ।
3) मूढस्य चन्द्रभूपतेः लोभस्य परिणामः कः ? निरूपयत ।
4) कर्णेन प्राप्तयोः शापयोः विषये सविमर्शं प्रबन्धं रचयत ।
5) श्रीशङ्कराचार्याणां चरित्रं निरूपयत ।

IV. **एकं** संस्कृतेन टिप्पणीं लिखत । **(1×4=4)**

1) उपनिषत् ।
2) महाभारतम् ।
3) पञ्चतन्त्रम् ।

V. निर्देशानुसारं संस्कृतभाषया **पञ्चदशवाक्यानि** पूरयत । **(15×1=15)**

अ) रेखाङ्कितपदस्य कारकं सूचयत ।

1) <u>शतानन्दः</u> विश्वामित्रं अवदत् । (करणं, अपादानम्, कर्तृ)
2) भीमः भीषणां <u>गदां</u> चिक्षेप । (कर्म, कर्तृ, करणं)
3) महीपाः <u>चण्डीशचापदण्डेन</u> विडम्बिताः । (करणं, अपादानं, कर्तृ)
4) <u>तस्मै</u> प्रयच्छ रत्नमालाम् । (कर्तृ, संप्रदानं, कर्म)
5) उपमन्युः <u>गुरुवचनात्</u> गाः अरक्षत् । (करणं, अपादानं, कर्तृ)

आ) वाक्यदोषान् परिहरत ।

6) भवान् राघवार्थं मम सुतां गृहाण ।

7) तव तेजसा शापेन मुक्तोस्मि ।

8) परशुरामाय नमामि ।

9) नृपतिं सह लोभेन सर्वे वनं प्रस्थिताः ।

10) अहं गुरुं इदं निवेदितवान् ।

इ) सन्धिनाम लिखत ।

11) पुनः + अरक्षत् = पुनररक्षत् । (विसर्गसन्धिः, सवर्णदीर्घसन्धिः, यण्सन्धिः)

12) न + एषा = नैषा । (गुणसन्धिः, वृद्धिसन्धिः, यण्सन्धिः)

13) अस्त + अचलः = अस्ताचलः । (सवर्णदीर्घसन्धिः, यण्सन्धिः, वृद्धिसन्धिः)

14) तावत् + एव = तावदेव । (यण्सन्धिः, जश्त्वसन्धिः, गुणसन्धिः)

15) सूची + अग्रम् = सूच्यग्रम् । (यण्सन्धिः, जश्त्वसन्धिः, गुणसन्धिः)

ई) समासनाम सूचयत ।

16) महान् चासौ मुनिश्च – महामुनिः । (कर्मधारयः, द्वन्द्वः, तत्पुरुषः)

17) गुणानां निधिः – गुणनिधिः । (बहुव्रीहिः, तत्पुरुषः, द्विगुः)

18) त्रयाणां भुवनानां समाहारः – त्रिभुवनम् । (बहुव्रीहिः, तत्पुरुषः, द्विगुः)

19) न सत्यम् – असत्यम् । (द्विगुः, नञ्तत्पुरुषः, द्वन्द्वः)

20) दिने दिने – प्रतिदिनम् । (अव्ययीभावः, कर्मधारयः, द्वन्द्वः)